International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2025; 2(1): 61-63
© 2025 IJMH
www.themultijournal.com
Received: 17-02-2025
Accepted: 21-02-2025
Publish : 22-02-2025

**डॉं.बि.कामाक्षम्मा**
सहायकाचार्या,
श्री.ला.ब.शा.रा.सं.विश्वविद्यालयः,
नई दिल्ली – 16

**Correspondence:**
**डॉं.बि.कामाक्षम्मा**
सहायकाचार्या,
श्री.ला.ब.शा.रा.सं.विश्वविद्यालयः,
नई दिल्ली – 16

# काव्ये दोषविषये विभिन्नालङ्कारिकाणामभिमतम्

**डॉं.बि.कामाक्षम्मा**

दोषाः काव्यसौन्दर्यघातकाः भवन्ति। काव्ये दोषसमावेशेन काव्यकलेबरं कलुषितं भवति। अत एव निर्दोषता काव्यस्य महान् गुणः इति केचन अभिप्रयन्ति। काव्यस्य परमं प्रयोजनम् अनन्दानुभूतिः। आनन्दानुभूतिः रसनिष्ठा भवति। अतः काव्ये रसदोषाः एव मुख्यतया त्याज्याः। किन्तु रसास्वादः अर्थाश्रितः। अर्थः शब्दनिष्ठः। शब्दः पदरूपेण, वाक्यरूपेणापि भवति। यद्यपि रस एव मुख्यः तथापि परम्परासम्बन्धेन शब्दार्थयोः ग्रहणम्। अतः शब्दार्थदोषाः अपि हेयाः।

काव्ये दोषविषये आलङ्कारिकाणामभिमतम्

**भरतमुनिः - नाट्यशास्त्रम्**

सर्वप्रथमं दोषनिरूपणं भरतमुनेः नाट्यशास्त्रे दरीदृश्यते। किन्तु तत्र गुणानां स्वरूपं स्पष्टमनुक्त्वा गुणविपर्ययाः एव दोषाः इति प्रोक्तमस्ति।[1]

1. एत एव विपर्यस्ता गुणाः काव्येषु कीर्तिताः।। ना.शा.7.95।

दोषाणां विषये भरतमुनेः दृष्टिकोणः पश्चाद्वर्ति-आचार्याणामिव तथा न कठोरः। अत एव सः वक्ति – संसारे दोषरहितं, गुणहीनं वा वस्तु नास्ति अतः विद्वांसः तस्मिन् विषये संवेदनशीलाः न भवेयुः इति।[2]

2. न च किञ्चित् गुणहीनं दोषैः परिवर्जितं न वा किञ्चित्।
तस्मान्नाट्यप्रवृत्तौ दोषा नात्यर्थतो ग्राह्याः।। ।।ना.शा.17.47।।

3. सर्वथा पदमप्येकं न निगाद्यमवद्यवत्।
विलक्ष्मणा हि काव्येन दुस्सुतेनेव निन्द्यते।।
।।काव्यालङ्कार.प्र.परिच्छेद.11।।

**भामहः – काव्यालङ्कारः**

भामहाचार्यः काव्ये निर्दोषस्य अनिवार्यतां प्रकटयति। काव्ये दोषस्य अस्तित्वं सुतरां नाङ्गीकरोति। काव्ये एकमपि दोषयुक्तं पदं न निगाद्यमिति अभिप्रैति।[3]

**एको हि दोषे गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः**

3.नाकवित्वमधर्माय व्याधये दण्डनाय च।
कुकवित्वं पुनस्साक्षात् मृतिमाहुर्मनीषिणः।।

**दण्डी - काव्यादर्शः**

दोषरहिता, गुणालङ्कारयुक्ता वाक् कामधेनुसदृशी इति दोषपूर्णावाक् मूर्खताद्योतिका इति ब्रवीति दण्ड्याचार्यः। यद्यथा –

**गोर्गोः कामदुघा सम्यक् प्रयुक्ता स्मर्यते बुधैः।**
**दुष्प्रयुक्ता पुनर्गोत्वं प्रयोक्तुः सैव शंसति।।**
।।काव्यादर्शः.16।।

काव्ये दोषस्य अल्पस्थितिमपि न सहते आचार्यदण्डी। अल्पमपि श्वेतकुष्ठस्य चिह्नं कमनीयशरीरस्य कान्तिं यथा नाशयति तद्वत् अल्पोपि दोषः काव्यसौन्दर्यं नाशयति अतः काव्ये दोषाः सर्वात्मना त्याज्याः इत्यभिप्रैति तद्यथा -

**तदल्पमपि नोपेक्ष्यं काव्ये दुष्टं कथञ्चन।**
**स्याद्वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भगम्।।** ।।का.आ.1.7।।
**काव्ये दोषागुणाश्चैव विज्ञातव्या विचक्षणैः।**
**दोषा विपत्तये तत्र गुणाः सम्पत्तये यथा।।** ।।का.आ.3.114।

किन्तु एकत्र वदति यथाशक्ति दोषरहितकाव्यरचना करणीया। किन्तु प्रतिभायुक्तकवेः काव्येषु दोषाः अपि दोषासीमामतिक्रमन्ति इत्यवोचत्। (काव्यादर्श.3.179)

**वामनः - काव्यालङ्कारसूत्राणि**

एते वाक्यवाक्यार्थदोषास्त्यागाय ज्ञातव्या।
ये त्वन्ये शब्दार्थदोषाः सूक्ष्मास्ते च गुणविवेचने वक्ष्यन्ते
उपमादोषाश्चोपमाविचारे।

ग्रन्थस्यास्य कामधेनुटीकाकारः अपि वदति – अस्मिन्नधिकरणे लक्षणीया दोषाः काव्यस्यासाधुत्वप्रपादकाः स्थूला इत्यवगन्तव्यम्
।। कामधेनु.2.1.3।।

**आनन्दवर्धनाचार्यः - ध्वन्यालोकः**

ध्वनिसिद्धान्दस्थापनात्परं दोषस्वरूपं स्पष्टतरं जातम्। रसापकर्षकाः दोषाः नित्याः इति, श्रुतिदुष्टादयोः दोषाः अनित्याः इति वदति। तद्यथा –

**श्रुतिदुष्टादयो दोषाः अनित्या ये च दर्शिताः।**
**ध्वन्यात्मन्येव शृङ्गारे ते हेया इत्युदाहृताः।।** ।।ध्व.आ.2.11।।

एते वदन्ति प्रबन्धे मुक्तके वा रसनिबन्धनेच्छुकेन कविना रसविरोधपरिहारार्थं यत्नः करणीयः इति। कविः अव्युत्पन्नमतिः चेत् काव्ये तेन कृतः दोषः झटिति प्रकाशते। कविः व्युत्पन्नमतिः चेत् तेन कृतः दोषः प्रतिभया आच्छादितः भवति। अर्थात् सः दोषः दोषत्वेन न प्रकाशते।

**प्रबन्धे मुक्तके वापि रसादीन् बन्धुमिच्छता।**
**यत्नः कार्यः सुमतिना परिहारे विरोधिनाम्।।**
**अव्युत्पत्तिकृतो दोषः शक्त्या संव्रियते कवेः।**
**यस्त्वशक्तिकृतो दोषः स झटित्येवावभासते।।**

**आचार्यमम्मटः – काव्यप्रकाशः**

मम्मटाचार्यः अदौषौ शब्दार्थौ काव्यम् इति प्रतिपादयति।

**विश्वनाथः – साहित्यदर्पणः**

विश्वनाथः स्वकीयसाहित्यदर्पणे प्रथमपरिच्छेदे मम्मटकाव्यलक्षण-खण्डनप्रसङ्गे अदोषौ इत्यत्र नञः प्रयोगः अल्पार्थे, सतिसम्भवे च अपि न वाच्यम्। अदोषौ शब्दार्थौ एव काव्यम् इति कथनेन काव्यस्य प्रविरलविषयता, निर्विषयता वा स्यादिति प्रतिपादयामास। अनेन दोषविषये तेषां कठोरत्वं नास्तीति सम्भावयितुं शक्यम्। यतो हि कालिदासादीनां काव्येष्वपि दोषसत्त्वात्।

**द्वयं गतं सम्प्रति शोचनीयतां**
**समागमप्रार्थनया कपालिनः।**
**कला च सा कान्तिमती कलावत-**
**स्त्वमस्य लोकस्य च नेत्रकौमुदी।।**

उपर्युक्तश्लोके 'त्वं' इत्यनन्तरमेव 'च' कारः योज्यः। किन्तु 'कला' पदानन्तरं 'च' कार योजनेन क्रमभङ्गो जातः अतः अक्रमत्वदोषः दर्शितः। "कालिदासकाव्येषु अपाणीयप्रयोगाः" इति विषये शोधकार्यमपि जातम्। अतः अदोषौ शब्दार्थौ काव्यमिति अङ्गीकुर्मश्चेत् लोके काव्यान्येव न सम्भवेयुः।

**सर्वथा निर्दोषस्यैव काव्यत्वासंभवात्**

**कुमारिलभट्टः एवमभिप्रैति -**
**न चाप्यतीव कर्तव्यं दोषदृष्टिपरं मनः।**
**दोषो ह्यविद्यमानोऽपि तच्चित्तानां प्रकाशके।।**

**दोषलक्षणविचारः**

**अग्निपुराणम्**

अग्निपुराणकर्ता दोषलक्षणमित्थं प्रतिपादितम् -

**उद्वेगजनको देषः ।** अग्निपुराणम्.5

**भरतमुनिः**

भरतमुनिः स्वकीय-नाट्यशास्त्रे गुणानां स्वरूपं स्पष्टतया अनुक्त्वा गुणविपर्ययाः एव दोषाः इति ब्रवीति यत्

**एत एव विपर्यस्ता गुणाः काव्येषु कीर्तिताः।**
।।नाट्यशास्त्रम्.7.95

**भामहः**

दोषस्य परिभाषा आचार्यभामहेन न किञ्चित् प्रतिपादिता। किन्तु भरतमुनेः अभिप्रायमेव स्वीकरोतीति ज्ञायते।

**दण्डी**

आचार्य दण्डिनापि दोषस्वरूपं स्पष्टं न प्रतिपादितम्। अयमपि भरतमुनेः अभिप्रायमेव स्वीकरोतीति ज्ञायते। किन्तु गुणाः काव्यसम्पत्तयः, दोषाः काव्यविपत्तयः इति वदति।

**दोषा विपत्तयस्तस्य गुणाः सम्पत्तयस्तथा।**

**वामनः**

वामनाचार्यः भरतमुनिप्रतिपादितदोषलक्षणेन प्रेरितः भूत्वा दोषलक्षणं इत्थं प्रतिपादयामास – **गुणविपर्ययात्मानो दोषाः**
अग्निपुराणं विहाय भरतमुनेः आरभ्य वामनाचार्यपर्यन्तं गुणविपर्ययात्मानो दोषाः इत्येव अङ्गीकुर्वन्ति।

**आनन्दवर्धनः**

**अनौचित्यादृते नान्यद्रसभङ्गस्य कारणम्।**
**प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत्परा।।** ।।ध्व.आ.3.14

मम्मटः - मुख्यार्थहतिर्दोषः रसश्च मुख्यः तदाश्रयाद्वाच्यः।
विश्वनाथः - रसापकर्षकाः दोषाः

**दोषविभागः**

**भरतमुनिः**

भरतमुनिना **दश**दोषाः प्रोक्ताः –
अगूढमर्थांतरमर्थहीनं भिन्नार्थमेकार्थमभिप्लुतार्थम्।
न्यायादपेतं विषमं विसंधि शब्दच्युतं वै दशकाव्यदोषाः।।
।।ना.शा.17.88।।

**भामहः - काव्यालङ्कारः**

भामहः स्वकीयकाव्यालङ्कारे **चतुर्षु स्थलेषु** दोषविचारमकरोत्। दोषविभागं नाकरोत्। प्रथमपरिच्छेदे रीतिविचारं कृत्वा **षट्** दोषान् विवृणोति

**नेयार्थक्लिष्टमन्यार्थमवाचकमयुक्तिमत्।**
**गूढशब्दाभिधानं च कवयो न प्रयुज्यते।।**1.37।।

अस्मिन्नेव स्थले पुनः चतुर्णां दोषाणां विवरणं ददाति –
**श्रुतिदुष्ट-अर्थदुष्ट-कल्पनादुष्ट-श्रुतिकष्टम्**

भामहाचार्यः पुनः **द्वितीयपरिच्छेदे** सप्त-उपमादोषान् प्रतिपादयामास। पूर्वमेते दोषाः आचार्य मेधाविना प्रोक्ता इति ज्ञायते। तद्यथा

**हीनतासम्भवोलिङ्गवचोभेदो विपर्ययः।**
**उपमानाधिकत्वं च तेनासदृशतापि च।।** 2.39
**त एत उपमादोषाः सप्तमेधाविनोदिताः।**

उपमा-यथासंख्य-उत्प्रेक्षालङ्कारविवरणसन्दर्भे आचार्य भामहः मेधाविनं स्मरति। माधावी अलङ्कारशास्त्रग्रन्थकर्ता इति रुद्रटाचार्यः अवोचत्। किन्तु मेधाविनः न कोपि ग्रन्थः उपलभ्यते। केवलं नाममात्रपरिचयः।

पुनः चतुर्थ-पञ्चमपरिच्छेदयोः काव्यदोषाणां विस्तृतविचारः कृतः। 18 (अष्टादश) दोषाः प्रोक्ताः।

**अपार्थं व्यर्थमेकार्थं ससंशयमपक्रमम्।**
**शब्दहीनं यतिभ्रष्टं भिन्नवृत्तं विसन्धि च।**
**देशकालकलालोकन्यायागमविरोधि च।**
**प्रतिज्ञाहेतुदृष्टान्तहीनं दुष्टं च नेष्यते।।**

काव्यालङ्कारः 4.1.2

पुनः प्रकीर्णरूपेण बहुविधदोषाणां वर्णनं कृतमस्ति। अपुष्टार्थता, वक्रोक्तिहीनता, ग्राम्यता, आकुलता इत्यादीनां वर्णनं वैदर्भीरीतिवर्णनसन्दर्भे कृतं वर्तते।

प्रायः 170 (सप्तत्यधिक एकशतं कारिकासु) दोषाणां विस्तदविचारः कृतः दृश्यते। किन्तु क्रमबद्धता नास्ति। विषयः विकीर्णः वर्तते। अपि च केषाञ्चन दोषाणां लक्षणं, केषाञ्चन दोषाणां उदाहरणं न प्रतिपादितम्। परन्तु पूर्वाचार्याणामपेक्षया दोषाणां विस्तृतविचारः भामहाचार्येण कृतः इति तु वक्तुं शक्यते। अलङ्कारदोषनिरूपणसन्दर्भे आचार्य मेधावी महोदयस्य प्रभावः दरीदृश्यते।

**आचार्यदण्डी**

भामहप्रतिपादित प्रतिज्ञा-हेतु-दृष्टान्तहीनदोषाणां खण्डनं करोति दण्डीमहोदयः। काव्यादर्श.3.127।

दण्डीप्रोक्ताः प्रायस्सर्वे दोषाः भरतमुनिप्रतिपादितदशदोषानाधारीकृत्यैव सन्ति। केवलम् **अपक्रमदोषे** एव भरतमुनेः प्रभावः नास्तीति ज्ञायते। दोषवर्णनसन्दर्भे भामहस्यापि प्रभावः दृश्यते। अतः वदति यथाशक्ति दोषरहितकाव्यरचना करणीया। किन्तु प्रतिभायुक्तकवेः काव्येषु दोषाः अपि दोषासीमां अतिक्रमन्ति इत्यवोचत्। (काव्यादर्श.3.179)

**वामनः**

वामनाचार्येण रचितः ग्रन्थः काव्यालङ्कारसूत्रवृत्तिः। तत्र द्वितीयाधिकरणे अध्यायद्वये दोषविवेचनं कृतं वर्तते। तेषां मते अपि गुणविर्ययाः एव दोषाः भवन्ति। वामनाचार्यस्य दोषनिरूपणे भरत-भामह-दण्डिनां प्रभावः वर्तत एव। गुणानामिव दोषाणामपि भेदद्वयं प्रतिपादितम् वामनाचार्येण – शब्दगतदोषाः, तथा अर्थगतदोषाः इति। पुनः पददोषाः- 5, पदार्थदोषाः – 5, वाक्यदोषाः -3, वाक्यार्थदोषाः -7. इति विभाजयामास। आहत्य 20 दोषान् अङ्गीकरोति।

दोषविवेचनस्यान्ते वामनाचार्यः वाक्य-वाक्यार्थदोषाः सर्वथा त्याज्याः किन्तु शब्ददोषाः एवं अर्थदोषाः सूक्ष्मत्वात् स्थानविशेषेण गुणत्वमपि प्राप्नुवन्ति।
एते वाक्यवाक्यार्थदोषास्त्यागाय ज्ञातव्या।
ये त्वन्ये शब्दार्थदोषाः सूक्ष्मास्ते च गुणविवेचने वक्ष्यन्ते उपमादोषाश्चोपमाविचारे।

**आनन्दवर्धनः**

**नित्यानित्यदोषविभागः**

**श्रुतिदुष्टादयो दोषाः अनित्या ये च दर्शिताः।**
**ध्वन्यात्मन्येव शृङ्गारे ते हेया इत्युदाहृतः।।** ध्व.आ.2.11।।

सः रसस्य पञ्चदोषान् प्रकाशयति –

**विरोधिरससम्बन्धिविभावादिपरिग्रहः।**
**विस्तरेणान्वितस्यापि वस्तुनोन्यस्य वर्णनम्।**
**अकाण्ड एव विच्छित्तिरकाण्डे च प्रकाशनम्।**
**परिपोषं गतस्यापि पौनःपुण्येन दीपनम्।**
**रसस्य स्याद्विनोदाय वृत्यनौत्यमेव च।।** ध्व.आ.3.18.19।।

**मम्मटाचार्यः**

**पद-पदार्थ-वाक्य-वाक्यार्थ-रसदोषाः**

**उपमादोषाः -विश्वनाथः**

ते पुनः पञ्चधा मताः
पदे तदंशे वाक्यार्थे सम्भवन्ति रसेपि यत्।
।।सा.द.7.परिच्छेद।।

काव्यदोषेभ्यः पृथक् अलङ्कारदोषाणाम् असंभवं प्रतिपादयति।

**एभ्यः पृथगलङ्कारदोषाणां नैव सम्भवः।** सा.द.7.15।

**निष्कर्षः –**

आचार्य भामह इव काव्ये एकमात्रमपि दोषं न सहन्ते चेत् संसारेस्मिन् एकमपि काव्यम् भवितुं नार्हति। यतो हि आदिकवेः वाल्मीकेः, कविकुलगुरोः कालिदास्यापि काव्ये दोषसत्वात्। अतः दोषविषये आचार्यभरतमुनेः, विश्वनाथस्य मतमङ्गीकारयोग्यमस्ति। कविः अव्युत्पन्नमतिः चेत् तेन कृतः दोषः झटिति प्रकाशते। कविः व्युत्पन्नमतिः चेत् तेन कृतः दोषः प्रतिभया आच्छादितः भवति। सः दोषः दोषत्वेन न प्रकाशते इति आनन्दवर्धनाचार्यस्य, एवमेव आचार्य दण्डिनश्च मतं युक्तियुक्तमस्ति। तत्र उदाहरणं कालदासादि महाकवयः एव भवन्ति।

**सहायकग्रन्थसूची**

1.नाट्यशास्त्रम् भरतमुनिः
2.काव्यालङ्कारः – भामहः
3.काव्यादर्शः - दण्डी
4.काव्यालङ्कारसारसंग्रहः – उद्भटः
5.सरस्वतीकण्ठाभरणम् – भोजराजः
6.काव्यप्रकाशः – मम्मटाचार्यः
7.ध्वन्यालोकः – आनन्दवर्धनः
8.व्यक्तिविवेकः – महिमभट्टः
9.वक्रोक्तिजीवितम् – कुन्तकः
10.रसगङ्गाधरः – जगन्नाथपण्डितः
11.साहित्यदर्पणः – विश्वनाथपण्डितः